वर्षम्-०३ अङ्कः-०३ शोधज्योतिः
जनवरी-दिसम्बर, २०२१ ISSN-2350-0700

# माहेश्वरतन्त्रे श्रीकृष्णोपासनानिरूपणम्

**प्रि. डॉ. नरेन्द्रकुमार पण्ड्या**[१]

## माहेश्वरतन्त्रपरिचयः

अक्षरातीतस्य भगवतः पुरुषोत्तमस्य श्रीकृष्णपरमात्मतत्त्वस्य प्रकाशकं माहेश्वरतन्त्रं विद्यते। पुरुषोत्तमः श्रीकृष्णपरमात्मा रसानन्दस्वरूपः विद्यते। स्वलीलाद्वैतस्वरूपिणः श्रीकृष्णस्य नामरूपलीलाधाम्नां व्याख्याकारकं माहेश्वरतन्त्रं विद्यते। **"रसो वै सः" "रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति"** (तै.-२/७) इत्यादिश्रुतिवचनात् भगवतः रसरूपत्वं प्रमाणितं भवति।

माहेश्वरतन्त्रे एकपञ्चाशत् (५१) अध्यायाः सन्ति। एतेषु अध्यायेषु विविधा विषयाः श्रीकृष्णभक्तिसाधनामन्त्रानुष्ठानसेवापूजाप्रकारादयः निरूपिताः सन्ति। माहेश्वरतन्त्रे आदितः श्लोकानां समष्ट्यङ्काः भान्ति ३०६० (त्रिसहस्राधिकं षष्टिः)

### माहेश्वरतन्त्रग्रन्थस्य प्रयोजनम्

इदमत्रानुभूयतां यदस्य माहेश्वरतन्त्रस्य प्रयोजनं किं वा आवश्यकता या विद्यते तद्विषये उक्तं यथा-

**"इदं माहेश्वरं तन्त्रं समाधौ यच्छ्रुतं मया।**
**प्रबोधसाधनी(जागनी जागृति)भूतं प्रियाणामिति मे मतिः॥**
**अन्यथेश्वरविज्ञानान्नान्यदेतत्प्रयोजनम् ॥१५॥**

अर्थात् अस्य मानुषस्य माहेश्वरतन्त्रम् उद्बोधकं जागृतिकारकं वर्तते।

इदं माहेश्वरतन्त्रं शिवपार्वत्योः संवादात्मकं विद्यते। पार्वत्या पृष्टानां प्रश्नानां शिवेन समाधानात्मकानि उत्तराणि प्रदत्तानि। अस्मिन् तन्त्रे अपूर्वं तत्त्वविज्ञानं प्रकटीकृतमस्ति। यथोक्तम्-

---

[१] प्राचार्यः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावल, गुजरात

**"त्वया प्रोक्तानि तन्त्राणि चतुःषष्टिमितानि भोः।**
**न तेषु तत्त्वविज्ञानं प्रकटीकृतमीश्वर॥**
**तत्प्रकाशय देवेश प्रवक्तुं यदि मन्यसे॥" (मा.त.-१/१५-१६)**

अत्र न हि निन्दा निन्दितुं प्रवर्तते अपि तु विधेयं स्तौति इति न्यायेन माहेश्वरतन्त्रोक्तविषयाणां प्राशस्त्यमभिव्यज्यते।

## माहेश्वरतन्त्रे ज्ञानस्य स्वरूपं महिमा च

माहेश्वरतन्त्रे ज्ञानस्य स्वरूपमर्धश्लोकेन सुन्दररीत्या सुस्पष्टतया च प्रतिपादितम्। तद्यथा- **"ज्ञानं तत्तु विजानीयात् येनात्मा भासते स्फुटः। अज्ञानेनावृतो नित्यं मोहरूपेण नित्यदा॥"** (मा.त.-१/२२) आत्मनः स्फुटभासनं ज्ञानेन भवति। अज्ञानावृतो जीवात्मा स्फुटं न भासते। अज्ञानं तु मोहरूपमिति निरूपितम्। यावदज्ञानं विद्यते तावत्संसारः, मोहः, भयम्, अहं ममेति असद्भावः विस्मृतिः स्वरूपस्य, दुःखदर्शनम्, नानाधर्मानुरागः, कर्मणां फलेषणा, बन्धमोक्षविभागः, जडदेहाद्यहङ्कारः, पाषाणप्रतिमादिषु ईश्वरभावः, जलादौ तीर्थबुद्धिः इत्यादिकं जायते यदा परिज्ञानस्य उदयो जायते तदा मोहभ्रमभयादिकं निवर्त्तते। यथोक्तम्-

**"तावत्संसारभावः स्याद्यावदज्ञानमुल्लसेत्।**
**तावन्मोहो भ्रमस्तावत्तावदेषु भयं भवेत्॥**

**अहं ममेत्यसद्भावो विस्मृतिर्दुःखदर्शनम्।**
**नानाधर्मानुरागश्च कर्मणां च फलेषणा॥**

**बन्धमोक्षविभागश्च जडदेहाद्यहङ्कृतिः ।**
**तावदीश्वरभावः स्यात्पाषाणप्रतिमादिषु ॥**

**जलादौ तीर्थभावश्च यावदज्ञानमुल्लसेत्।**
**उदिते तु परिज्ञाने नाऽयं लोको न कल्पना॥" (मा.त.-१/२३-२६)**

ज्ञानस्य परिस्फुरणेन मोहात्मकस्य अज्ञानस्य निवृत्तिर्जायते यथा शुक्तिकायां रजतस्य भ्रान्तिः भवति किन्तु यथार्थज्ञानेन भ्रान्तिः निवर्त्तते रज्जौ च सर्पभ्रान्तिः निवृत्ता भवति। मोहस्य सत्त्वेन अक्षरे ब्रह्मणि सकलं जगत् भाति मोहनाशे तु साक्षादक्षरम् अव्ययं परं ब्रह्म अवशिष्यते।

## सद्गुरूपासनया ज्ञानोदयः

माहेश्वरतन्त्रस्य अष्टाविंशे पटले पार्वती परमेश्वरं महादेवं कं गुरुमुपासीत? कथं ज्ञानोदयो भवेत्? इति पृच्छति। एतस्य प्रश्नस्य अभिनन्दनं विधाय एतज्ज्ञानस्य गोपनीयतां च रक्षितुं सूचयित्वा भगवान् शिवः सद्गुरोः शरणागतिं गृहीतुमुपदिशति।

**"मायाग्रस्तमिदं विश्वं नानादुःखभयातुरम्।**
**अनित्यभवसन्तापपरितप्तं समन्ततः॥**

**कालदण्डभुजङ्गेन ग्रस्तमानमहर्निशम्।**
**दृष्ट्वा विरक्तः सततं स्वात्मनः शिवहेतवे॥**
**सद्गुरोः शरणं यायात् शुद्धभावेन भामिनि॥" (मा.त.-२८/३-५)**

अत्र माहेश्वरतन्त्रानुसारं सूर्यवत् सर्वदीपकाः गुरवो दुर्लभाः सन्ति। गुरुः कीदृशः उपासनीय इति प्रश्नानुरोधेन गुरोः लक्षणानि निरूपितानि तदनुसारं शिष्यहृत्तापहारकः, शुद्धान्वयः, शुद्धचेताः, शुद्धवेशः, शुभाकृतिः, शुभवादी, शुभाचारः, शुद्धभावः, शुचिः, वेदशास्त्रार्थतत्त्वज्ञः, लोकसङ्गविवर्जितः, अलोलुपः, सुशीलश्च, दयादाक्षिण्यसंयुतः, त्यागी, विरागी, गुणवान्, गुणज्ञः, शिष्यवत्सलः, सन्तुष्टः, शरण्यः, क्रोधवर्जितः, स्वसिद्धान्तार्थतत्त्वज्ञः, मितवाक्, लोकवल्लभः, पवित्रः, संशयच्छेत्ता, कृष्णप्रेमप्लुतः इति गुरोर्गुणाः निगदिताः। एतादृशं गुरुमुपेत्य प्रणामं विधाय प्रार्थयते। तद्यथा-

**भो नाथ करुणासिन्धो संसारार्णवतारक।**
**भ्रान्तं संसारगहने नानातापसमाकुले॥**

**अत्यन्तदीनहृदयं सर्वसाधनवर्जितम्।**
**अज्ञानपङ्कनिर्मग्नं मामुद्धर दयानिधे ॥**

**अहं त्वां शरणं प्राप्तः शरण्यस्त्वं दयानिधिः।**
**अविलम्बेन संसारविच्छेदं कुरु मे प्रभो॥**

इत्थं प्रार्थितः गुरुः शिष्यमुपदिशति।

**न वर्णेषु तदा कश्चित् ब्राह्मणक्षत्रियादिषु।**
**न देवोऽसि न गन्धर्वो नासुरः पन्नगोऽपि वा॥**

**न त्वं देहो न त्वद्देहो नेन्द्रियाणि तथा मनः।**
**न च प्राणो बुद्धिस्त्वं नाहङ्कारो भवान्मतः॥ (मा.त.-२८/३७-३९)**

**श्रीकृष्णस्य प्रिया चासि पूर्णस्य परमात्मनः।**
**उद्बुद्ध्य स्वप्रतश्चित्ते प्रियाभावं निजं श्रयः॥**

**तिरोभूय च शनकैर्मायादेहमनीप्सितम्।**
**क्षरं चैवाक्षरं हित्त्वा स्वपतिं पुनरेष्यसि॥ (मा.त.-२८/४३-४४)**

एवमुपदिष्टाय गुरुः मन्त्रराजोपदेशं करोति।

## मन्त्रराजोपदेशः

मन्त्रराजस्य श्रवणमात्रेण सर्वमन्त्रफलं भवति। ईदृशस्य मन्त्रराजस्य निरूपणाय प्रार्थितः परमेश्वरः एतन्मन्त्रराजमाहात्म्यं ब्रूते। अयं मन्त्रराजः महान् गोप्यतरो विद्यते। अस्य सकृत् जपादपि पापानि प्रलीयन्ते। अस्य मन्त्रराजस्य लेखनं कृत्वा देयः अन्यथा पापमवाप्नुयात्। श्रीकृष्णं प्रति वासनाया निर्धारत्वे तत्प्रेमोद्गमे सत्येव मन्त्रमुपदिशेत् अन्यथा कृष्णघातकदोषो भवति। एवमुक्त्वात्र एकोनपञ्चाशद्वर्णात्मकः उपदिष्टः। मन्त्रराजस्य पद्यैरेव निरूपणं दर्शितमस्ति।

**श्रुणु मन्त्रं प्रवक्ष्यामि सावधानेन चेतसा।**
**स्वर आद्यश्चतुर्थश्च आकाशस्तदनन्तरम्॥**

**वायुबीजं ततः पश्चात् अग्निबीजमतः परम्।**
**ततो वरुणबीजं च भूबीजं स्यात्ततः परम्॥**

**श्रीकृष्ण परमानन्द ते प्रियास्मीति वै वदेत्।**
**मामङ्गीकुर्विति चोक्त्वा दर्शयेति द्वयं वदेत्॥**

**प्रबोधयेति द्वितयं मोहेति च ततो वदेत्।**
**मपाकुरुद्वयं चोक्त्वा नमोन्तोयं महामनुः॥ (मा.त.-२९/९-१२)**

अँ-अक्षरबीजम्, ईँ-मायाबीजम्, (**इच्छाज्ञानक्रियात्मा च कालत्रितयरूपिणी। अग्निसोमार्करूपा च सर्वत्रितयरूपिणी॥**) (मा.त.-२९/२१) हँ तःलँ पञ्च महाभूतानि-बीजानि।

अयं मन्त्रः चूडामणिमन्त्र इति कथ्यते। **"मन्त्रचूडामणिं ज्ञात्वा मुच्यते सर्वसंशयात्। विज्ञाते मन्त्रराजन्ये ज्ञातव्यं नावशिष्यते॥ शाब्दं वपुः परानन्दवपुषः परमेश्वरि। मन्त्रचूडामणिरयं मया ते परिकीर्तितः॥"** (मा.त.-२९/३५-३६)

यथा चिन्तामणौ लब्धे अन्यधनसञ्चयानामपेक्षा नावशिष्यते तथा मन्त्रराजे लब्धे अन्यसाधनापेक्षा न भवति।

तज्जपस्तदर्थभावनेति नयात् मन्त्रार्थभावनया चित्तशुद्धिः जायते मायामालिन्यमपैति विवेकोपलब्धिश्च जायते।

**"एतन्मन्त्रार्थविज्ञानं मन्त्रसिद्धान्तसूचकम्।**
**यो नित्यं भावयेच्चित्ते वासना तस्य शुद्ध्यति॥**

**विहाय मायामालिन्यं देहेन्द्रियनिबन्धनम्।**
**वासना सम्मुखीभूयाद्विवेकं प्रतिबिम्बवत्॥" (मा.त.-२९/४२-४३)**

## श्रीकृष्णसेवापूजाप्रकारनिरूपणम्

माहेश्वरतन्त्रस्य एकत्रिंशे पटले प्रभोः श्रीकृष्णस्य सेवापूजाप्रकारः व्यवहारविधिश्चेति पृष्टं पार्वत्या।

**ब्रूहि सेवाप्रकारं मे येन तुष्येत्स्वयं प्रभुः। कथं पूजा प्रकर्तव्या व्यवहारश्च कीदृशः॥** (मा.त.-३१/१) एवं पृष्टे सति शिव उपदिदेश यत् चतुर्थप्रहरे समुत्थाय ब्रह्मरन्ध्रे गुरुं ध्यात्वा पञ्चभूतात्मकैः पञ्चोपचारैः गुरुं समर्च्य तद्गतं आत्मानं स्मरेत्। ततो नमस्कुर्यात् **"नमोऽस्तु गुरवे तस्मै इष्टदेवस्वरूपिणे। यस्य वागमृतं हन्ति विषं संसारसंज्ञकम्॥ गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवः सदाशिवः। गुरुरेव परं तत्त्वं तस्मै श्रीगुरवे नमः॥"** (मा.त.-३१/६-७) ततश्च- **"ध्यायेत्कृष्णं हृदम्बुजे"** ततः पञ्चोपचारैः पूजयेत्। ततः प्रार्थयेत् तद्यथा-

**"अहं नाथ त्वदीयास्मि पतिस्त्वं मेऽसि भो प्रभो।**
**भ्रमितास्मि त्वया नाथ मायागहनवर्त्मनि॥**

**त्वत्पार्श्वं नय मां नाथ विरहो मां प्रबोधत।**
**अनन्यगतिका चाहं तस्मात् कुरु यथोचितम्॥" (मा.त.-३१/१०-११)**

एवं सम्प्रार्थ्य ततः भूमिं प्रार्थयेत्- **"समुद्रमेखले देवि पर्वतस्तनमण्डले। विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे॥** (मा.त.-३१/१३-१४) ततः शौचादिकं विधाय स्नानादिकं विधाय गोपिकाचन्दनं धृत्वा चक्र-तुलसीमालाधारणं कृत्वा पूजनागारं प्रविश्य प्रभुमुत्थापयेत्- प्रभोस्तु उत्थापनं सुगीतैः मङ्गलनादैः कर्तव्यम्। भगवन्मूर्तिपूजायां विविधा मूर्तयः भवन्ति मनोमयी, सौवर्णी, राजती, शैली, काष्ठी, पाषाणी, रत्नमयी, मृण्मयी, पैत्री इत्यादि। तत्र मनोमयी श्रेष्ठा मूर्तिः कथ्यते। एतां मूर्तिं शुभैः उपचारैः पूजयेत्। उपचारेषु पाद्यार्घाचमनस्नानमधुपर्काङ्गप्रोञ्छनवस्त्राभरणदर्पणालोकन-

गन्धपुष्पधूपागरुदीपनैवेद्यपानीयाचमन-हस्तवासस्ताम्बूलानुलेपनीराजनादिकगीतवाद्यनृत्यस्तुति-प्रदक्षिणपुष्पाञ्जलिनमस्कारसाष्टाङ्गप्रणतिरूपैः उपचारैः प्राणनाथं प्रभुं पूजयेत्।

## द्विविधं पूजनम्

पूजनं द्विविधं मतम् एकम् अनिर्माल्यं द्वितीयं च निर्माल्यम्। तत्र मनोभवैः दिव्यैः पुष्पैः गन्धद्रव्यैश्च भक्तैः यदर्चनं क्रियते तत् अनिर्माल्यम्। उक्तं च-

**"दिव्यैर्मनोभवैः पुष्पैर्गन्धद्रव्यैर्मनोहरैः।**
**भक्तैर्यत्क्रियते सम्यगनिर्माल्यं तदर्चनम्॥" (मा.त.-३१/४९)**

एतदर्चनं मानसी पूजा इत्यपि वक्तुं शक्यते। पुष्टिमार्गे तनुजा वित्तजा मानसी चेति त्रिविधा सेवा मता तत्र तनुजा-वित्तजासेवापेक्षया मानसी सेवा परा श्रेष्ठा मन्यते।

यानि प्राकृतपुष्पचन्दनादीनि भवन्ति तानि निसर्गतः जातमात्राणि एव पञ्चभिः महाभूतैः, सूर्येण, चन्द्रेण, भ्रमरादिभिः, प्राणिभिश्च घ्रातानि भवन्ति, अत्र विषये संशयो न विद्यते। एतैः प्राकृतैः ग्रामारण्यादिसम्भूतैः मनोहरैः पूजाद्रव्यैः यदर्चनं क्रियते तत् सनिर्माल्यं पूजनं कथ्यते। एतेन अर्चनेन दिव्यभोगापवर्गप्राप्तिः भवति। सनिर्माल्यपूजनेन अल्पफलं सिद्ध्यति अनिर्माल्यात् मानसात् पूजनात् महत् फलं प्राप्यते। **"जातमात्राणि पुष्पाणि घ्रातान्येव निसर्गतः। पञ्चभिश्च महाभूतैर्भानुना शशिनापि च॥ प्राणिभिश्च द्विरेफाद्यैः पौष्पैरेव न संशयः। यदर्चनं सनिर्माल्यं दिव्यभोगापवर्गदम्॥ ग्रामारण्यादिसम्भूतैः पूजाद्रव्यैर्मनोहरैः। घ्रातपुष्पात्फलं सिद्ध्येदल्पं नो मानसात्तथा॥"** (मा.त.-३१/४९-५१)

सनिर्माल्यं बाह्यं पूजनमपि दिव्यभोगापवर्गप्रदत्वात् अवश्यम् अपरिहार्यम् एकं च बुद्धिशुद्ध्यै पूजनं विधेयम्। **"तस्मादपरिहार्यत्वादन्यथा चाप्युपायतः। बुद्धिशुद्ध्यै ततो देवि बाह्यद्रव्यैः प्रपूजयेत्॥"** (मा.त.-३१/५२)

## उत्तमादिभेदेन पूजायास्त्रैविध्यम्

उत्तमा, मध्यमा अधमा इति त्रिविधा कृष्णपूजा कथिता। तत्र सकलैः विहितैः उपकरणैः(उपचारैः) विधीयमाना कृष्णपूजा उत्तमा, यथालब्धैः निष्पाद्या मध्यमा एवं पत्रपुष्पाम्बुनिष्पाद्या पूजा अधमा, उक्तं च यथा- **"पुनस्त्रेधा कृष्णपूजा चोत्तमाधममध्यमा। यथोपकरणैः कृत्स्नैः क्रियमाणोत्तमोत्तमा॥ यथालब्धैर्विनिष्पाद्या द्रव्यैः पूजा तु मध्यमा। पत्रपुष्पाम्बुनिष्पाद्या पूजा चाऽधमसंज्ञिका॥"** (मा.त.-३१/५३-५४)

## पूजाक्रमनिरूपणम्

मानसी पूजा बाह्यपूजा इति द्विविधा पूजा प्रोक्ता। तत्र पूर्वं मानसी पूजा कर्तव्या तदनन्तरं बाह्यपूजा विधेया। तत्र बाह्यपूजायां नीराजनान्तं पूजनं विधाय जितेन्द्रियः सन् जपं कुर्यात् जपे अपि तुलसीकाष्ठमणिभिः कृतया मालया त्रिसन्ध्यं शतं सहस्रं वा जपः करणीयः। तदुक्तं- **"आदौ तु मानसीं कृत्वा ततो बाह्यां प्रवर्त्तयेत्। नीराजनान्तमासाद्य जपं कुर्याज्जितेन्द्रियः॥ तुलसीकाष्ठसम्भूतैर्मणिभिः कृतमालया। जपेच्छतं सहस्रं वा त्रिसन्ध्यास्वपि तं जपेत्॥"** जपावसरे कम्बलकौशेयवस्त्रदर्भासनादिनिर्दिष्टासनं करणीयम्।

## ज्ञानोदये साधनसम्पत्तिः

साधकः जपपूजाज्ञानमात्रेण (Only Information) जपपूजादिकरणेन विना परत्र इह च लोके कल्याणं न प्राप्नोति। विहितानुष्ठानं विधेयमेव। साधकः अहिंसादिसद्गुणसाधनसम्पन्नोऽपि स्यात्। ते च सद्गुणाः अहिंसासत्यास्तेयब्रह्मचर्यार्जवक्षमाधैर्यमिताहारास्तिक्यदानवैराग्यविवेकशमश्रद्धादममुमुक्षता-समाधानाख्याः सन्ति। एतत्साधनसम्पत्त्या दारिद्र्यशमनं ज्ञानं सम्पद्यते। यथोक्तं-

**"न गृही ज्ञानमात्रेण परत्रेह च मङ्गलम्।**
**प्राप्नोति चन्द्रवदने जपपूजादिभिर्विना॥**

**अहिंसासत्यमस्तेयं ब्रह्मचर्यदमार्जवम्।**
**क्षमा धैर्यं मिताहारं आस्तिक्यं दानमेव च॥**

**वैराग्यं च विवेकश्च शमः श्रद्धा दमस्तथा।**
**मुमुक्षता विवेकश्च समाधानं तथाऽऽत्मनः॥**

**एतत्साधनसम्पत्तिं कुर्वतां परमेश्वरि।**
**ज्ञानं दारिद्र्यशमनं भविष्यति न संशयः॥" (मा.त.-३१/६०-६३)**

अत्र उद्देशतः अहिंसादिकं निरूप्य पुनस्तत्तद्गुणानां लक्षणानि कथितानि।

## मन्त्रराजपुरश्चरणविधिः

माहेश्वरतन्त्रस्य द्वात्रिंशपटले पार्वतीप्रश्नानुसारं भगवान् शिवः पुरश्चरणविधिं प्रोक्तवान्। सेवया सद्गुरोः प्रसादेन च मन्त्रं लब्ध्वा तन्मन्त्रजागरणार्थं जपहोमार्पणादिकमनुष्ठेयम्। जपादिपुरश्चरणाय शून्यागार-गिरि-तीर्थस्थानोद्यानसिद्धपीठप्रयागपुष्करनर्मदातटविन्ध्याद्रिशुभस्थल-माश्रयणीयम्।

एतादृशशुभस्थलेषु मन्त्रराजजपानुष्ठानेन सिद्धिः सञ्जायते। जपादिपुरश्चरणकर्ता जितेन्द्रिय-जितक्रोध-दृढव्रत-जितचित्त-दृढवैराग्यसम्पन्न-देहाहङ्कारवर्जित-सर्वभूतदयालु-भूतबाधापराङ्मुख-सङ्कातङ्कादिरहित-रागद्वेषविवर्जित-परित्यक्तदेहगेहादिचित्त-प्रशान्तधी-मन्त्रध्यानपर-नित्यलीलाध्यानपरायण-त्रिधास्त्रीसङ्गत्यागि-ध्यानमुद्राधर-मौनि-त्रिषवणस्नायि-शुचिदेह-श्वेताम्बर-वर्णाश्रमक्रियायुक्त-विश्वासि-देवब्राह्मणगोनिन्दारहितानसूयकलोभवर्जितः भवन् पुरश्चरणं कुर्यात्। मनसा कल्पितनियतक्षेत्रसीमाया दिग्रक्षणं कृत्वा तत्रैव अवस्थाय तद्बहिः अगत्वा पुरश्चरणं कुर्यात्। औदासीन्यभयक्रोधनिन्द्रातन्द्रादिवर्जनं कृत्वा दुग्धपानफलाहारभिक्षान्नकन्दमूलफलपत्रायाचिताहारेण दैहिकवृत्तिं कल्पयेत्। इन्द्रियविकारान् विहाय वाङ्मनःकायकौटिल्यं सर्वथा परित्यज्य जपादिकं करणीयम्। जपं कुर्वन् श्रान्तः लीलाध्यानं कुर्वीत। मध्यन्दिनपर्यन्तं जपं कुर्यात् ततः मनसा लीलां ध्यायेत्। प्रतिदिनं मन्त्रजपदशांशेन होमं कुर्यात्। अथवा लक्षपर्यन्तं जपं कृत्वा होमं कुर्यात्। अथवा समाप्तावपि यथासम्भवं होमं कुर्यात्। पुरश्चरणे प्रत्यक्षरं लक्षं जपेत्।

अष्टचत्वारिंशल्लक्षजपानुष्ठानेन ब्रह्मपुरश्रीदर्शनम्, सुधासिन्धौ वृन्दावनस्थितम् उत्तमं पुरुषं ध्याने साक्षादिव पश्यति साधकः।

**"उत्तमं पुरुषं पश्येत् ध्याने साक्षादिव स्वयम्।**
**ततस्तापो भवेत्तीव्रविरहेण फलात्मकः॥**
**तदा च नियमाः सर्वे कृता वाप्यकृता अपि।**
**समाप्यन्ते महेशानि स्वास्थ्याभावस्वभावतः॥"** (मा.त.-३२/७९-८०)

## सुदुर्लभतापावस्थानिरूपणम्

मन्त्रराजपुरश्चरणविधिं श्रुत्वा पार्वती तापावस्थां परिपृच्छति तापावस्थानुभवेन पूर्णरसानुभूतिः सम्यक् सञ्जायते। इमं प्रश्नं समाधातुं सदाशिवः उपदिशन्नाह यथा- **ब्रह्म रसात्मकं रसभोक्तृ चास्ति।** रसेषु आदौ प्रोक्तः शृङ्गारः संयोगविप्रलम्भात्मा द्विविधः। तत्र विप्रलम्भात्मा रसः परमं फलं कथितम्। तापोदयेन विना विप्रलम्भस्य सिद्धिः न भवति।

**"दशावस्था भवन्त्येताः तापे विरहसम्भवे।**
**तास्ते वक्ष्यामि देवेशि शृणुष्वेकाग्रमानसा॥**
**अभिलाषस्तथा चिन्ता स्मरणंच ततः प्रिये।**
**उद्वेगाधिप्रलापश्च जडतोन्माद एव च॥**
**गुणानां कीर्तनं चैव मरणं दशमं स्मृतम्।**
**अत्युग्रविरहे देवि अवस्था दशमी भवेत्॥"** (मा.त.-३३/८-१०)

यथा कश्चिद्राजपुत्रः दैवाद् वनेचरैः सह वसन् आत्मानं विवशं वनेचरं जानाति स्वस्य प्रभुत्वशौर्यधैर्याद्यान् धर्मान् विस्मृतवान् कृपणधीः मन्दः दीनः पशुमांसोपजीवनः आत्मापह्नवमापन्नः केनचित् तत्स्वरूपविदा बुधेन बोध्यते **"न वनेचरपुत्रोऽसि राजपुत्रोऽसि सर्वथा।"** एवं सद्गुरुणा जीवः तत्स्वरूपं बोधयित्वा अभिलाषजागरणं विधीयते शिष्ये।

**"एवं सद्गुरुणा वाक्यामृतैरासेचिता यदा।**
**निर्वाप्य मोहभुजगविषज्वालां व्यथाकरीम्॥**
**अभिलाषवती भूयात् परानन्दपतिं प्रति।" (मा.त.-३३/५५-५६)**

ततः क्रमेणापरास्तापावस्थाः जायन्ते।

## मानसीसेवासिद्धिपर्यन्तं बहिःसेवा आवश्यकी

विरक्तस्य योगिनो मनो ध्यानरतं भवति तद्वत् साधकस्य सम्यक् प्रजातया स्मृत्या मनो लीलारतं भवति। स्मृत्याख्यावस्थया मानसी सेवा प्रसिद्ध्यति अन्यथा न। तस्मात् यावत् स्मृतिसिद्धिः स्यात् तावत् अन्तर्बहिः सेवा कार्या। स्मृतिं विना बहिःसेवात्यागः न कार्यः। अन्यथा प्रत्यवायः भवेत्। मार्गभ्रष्टश्च भवेत्। यथोक्तं-

**"स्मृतिं विना तु देवेशि बहिःसेवां परित्यजेत्।**
**प्रत्यवायमवाप्नोति मार्गभ्रष्टो भवेदपि॥**

**स्मृत्यवस्थैव देवेशि मानसीमूलमुच्यते।**
**मानस्यां जायमानायां बाह्यसेवा निवर्त्तते॥**

**प्रियसेना प्रियाधर्मो यावत्सर्वेन्द्रियक्रिया।**
**सर्वेन्द्रियक्रियाभावान्मानसी सा प्रवर्त्तते॥" (मा.त.-३७/३-५)**

अष्टचत्वारिंशादिपटलेषु कृष्णपूजाया विस्तृतं वर्णनं प्राप्यते। एवमिह माहेश्वरतन्त्रे श्रीकृष्णोपासनाया निरूपणं प्राप्यते तदवगत्य सेवां कर्तुं शक्नोति साधकः।

**नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम्। (भाग.-१/५/१२)**

**शास्त्रमवगत्य कायवाङ्मनोभिः कृष्णः सेव्यः।** (तत्त्वदीपिकानिबन्धे महाप्रभुः श्रीवल्लभाचार्यः)

॥इति शम्॥

**सन्दर्भग्रन्थाः**

(१) श्रीमाहेश्वरतन्त्रम्, डॉ. वंशीधर शर्मा, प्रका.-श्रीरामरत्नदास ट्रस्ट(राज.), श्रीनिजानन्द आश्रम, शेरपुर, मु.पो. जडादेपण्डा, जि. सहरानपुरा, उत्तरप्रदेश

(२) श्रीमद्भागवतमहापुराणम्, गीताप्रेस, गोरखपुर

(३) तत्त्वार्थदीपिकानिबन्धः, श्रमद्वल्लभाचार्यविरचितः

(४) तैत्तिरीयोपनिषद्